# ॥ श्रीसूर्याष्टकम् ॥

साम्ब उवाच

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।

दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तुते ॥१ ॥

सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम् ।

श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥२ ॥

लोहितं रथमारूढं सर्वलोकपितामहम् ।

महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३ ॥

त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम् ।

महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥४ ॥

बृम्हितं तेजसाः पुञ्जं वायुराकाशमेव च ।

प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५ ॥

बन्धूकपुष्पसङ्काशं हारकुण्डलभूषितम् ।

एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥६ ॥

तं सूर्यं लोककर्तारं महातेजःप्रदीपनम् ।

महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥७ ॥

तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम् ।

महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥८ ॥

सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम् ।

अपुत्रो लभते पुत्रं दरिद्रो धनवान् भवेत् ॥

आमिषं मधुपानं च यः करोति रवेर्दिने ।

सप्तजन्म भवेद्रोगी जन्मजन्म दरिद्रता ॥

स्त्रीतैलमधुमांसानि यस्त्यजेद्धि रवेर्दिने ।

न व्याधिस्शोकदारिद्र्यं सूर्यलोकं स गच्छति ॥

इति साम्बपुराणे रोगापनयने सूर्याष्टकं समाप्तमगमत्

This Suryashtakam forms a part of Samba Purana, where Samba himself is considered to be a great Suryopasaka. By reciting this hymn with devotion, one is blessed with relief from Navagraha Pida. Those without progeny obtain their desire and poor obtain riches. One who indulges in madhu and maithuna on Sundays (especially during the day - Linga Purana), will be diseased for seven lifetimes and also remains devoid of prosperity. One who worships Lord Suryanarayana and recites this hymn after giving up oil, copulation, meat and liquor on Sundays, is blessed with health and wealth.

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]